# Shrirama Kavacham

# શ્રીરામકવચમ્

## Document Information

Text title : Ramakavacham 1

File name : raamakavachaAnanda.itx

Category : kavacha, raama, vAlmIki

Location : doc_raama

Author : Valmiki

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma, PSA Easwaran

Description-comments : from Anandaramayana

Latest update : May 2, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 26, 2024

*sanskritdocuments.org*

# શ્રીરામકવચમ્

॥ શ્રીમદાનન્દરામાયણે મનોહરકાણ્ડાન્તર્ગતં શ્રીરામકવચમ્ ॥

॥ ૐ શ્રી રામાય તુભ્યં નમઃ ॥

અગસ્તિરુવાચ-
આજાનુબાહુમરવિન્દદળાયતાક્ષમાજન્મશુદ્ધરસહાસમુખપ્રસાદમ્ ।
શ્યામં ગૃહીતશરચાપમુદારરૂપં રામં સરામમભિરામમનુસ્મરામિ ॥ ૧॥

શ‍ૃણુ વક્ષ્યામ્યહં સર્વં સુતીક્ષ્ણ મુનિસત્તમ ।
શ્રીરામકવચં પુણ્યં સર્વકામપ્રદાયકમ્ ॥ ૨॥

અદ્વૈતાનન્દચૈતન્યશુદ્ધસત્ત્વૈકલક્ષણઃ ।
બહિરન્તઃ સુતીક્ષ્ણાત્ર રામચન્દ્રઃ પ્રકાશતે ॥ ૩॥

તત્ત્વવિદ્યાર્થિનો નિત્યં રમન્તે ચિત્સુખાત્મનિ ।
ઇતિ રામપદેનાસૌ પરબ્રહ્માભિધીયતે ॥ ૪॥

જય રામેતિ યન્નામ કીર્તયન્નભિવર્ણયેત્ ।
સર્વપાપૈર્વિનિર્મુક્તો યાતિ વિષ્ણોઃ પરં પદમ્ ॥ ૫॥

શ્રીરામેતિ પરં મન્ત્રં તદેવ પરમં પદમ્ ।
તદેવ તારકં વિદ્ધિ જન્મમૃત્યુભયાપહમ્ ।
શ્રીરામેતિ વદન્ બ્રહ્મભાવમાપ્નોત્યસંશયમ્ ॥ ૬॥

ૐ અસ્ય શ્રીરામકવચસ્ય અગસ્ત્ય ઋષિઃ । અનુષ્ટુપ્ છન્દઃ ।
સીતાલક્ષ્મણોપેતઃ શ્રીરામચન્દ્રો દેવતા ।
શ્રીરામચન્દ્રપ્રસાદસિદ્ધ્યર્થં જપે વિનિયોગઃ ॥

અથ ધ્યાનં પ્રવક્ષ્યામિ સર્વાભીષ્ટફલપ્રદમ્ ।
નીલજીમૂતસઙ્કાશં વિદ્યુદ્વર્ણામ્બરાવૃતમ્ ॥ ૧॥

કોમલાઙ્ગં વિશાલાક્ષં યુવાનમતિસુન્દરમ્ ।

સીતાસૌમિત્રિસહિતં જટામકુટધારિણમ્ ॥ ૨॥

સાસિતૂણધનુર્બાણપાણિં દાનવમર્દનમ્ ।
યદા ચોરભયે રાજભયે શત્રુભયે તથા ॥ ૩॥

ધ્યાત્વા રઘુપતિં યુદ્ધે કાલાનલસમપ્રભમ્ ।
ચીરકૃષ્ણાજિનધરં ભસ્મોદ્ધૂળિતવિગ્રહમ્ ॥ ૪॥

આકર્ણાકૃષ્ટસશરકોદણ્ડભુજમણ્ડિતમ્ ।
રણે રિપૂન્ રાવણાદીન્ તીક્ષ્ણમાર્ગણવૃષ્ટિભિઃ ॥ ૫॥

સંહરન્તં મહાવીરમુગ્રમૈન્દ્રરથસ્થિતમ્ ।
લક્ષ્મણાદ્યૈર્મહાવીરૈર્વૃતં હનુમદાદિભિઃ ॥ ૬॥

સુગ્રીવાદ્યૈર્માહાવીરૈઃ શૈલવૃક્ષકરોદ્યતૈઃ ।
વેગાત્ કરાલહુઙ્કારૈઃ ભુગ્ભુક્કારમહારવૈઃ ॥ ૭॥

નદદ્ભિઃ પરિવાદદ્ભિઃ સમરે રાવણં પ્રતિ ।
શ્રીરામશત્રુસઙ્ઘાન્મે હન મર્દય ઘાતય ॥ ૮॥ (ખાદય)

ભૂતપ્રેતપિશાચાદીન્ શ્રીરામાશુ વિનાશય ।
એવં ધ્યાત્વા જપેદ્રામકવચં સિદ્ધિદાયકમ્ ॥ ૯॥

સુતીક્ષ્ણ વજ્રકવચં શ‍ૃણુ વક્ષ્યામ્યહં શુભમ્ ।
શ્રીરામઃ પાતુ મે મૂર્ધ્નિ પૂર્વે ચ રઘુવંશજઃ ॥ ૧૦॥

દક્ષિણે મે રઘુવરઃ પશ્ચિમે પાતુ પાવનઃ ।
ઉત્તરે મે રઘુપતિઃ ભાલં દશરથાત્મજઃ ॥ ૧૧॥

ભ્રુવોર્દૂર્વાદળશ્યામઃ તયોર્મધ્યે જનાર્દનઃ ।
શ્રોત્રં મે પાતુ રાજેન્દ્રો દૃશૌ રાજીવલોચનઃ ॥ ૧૨॥

ઘ્રાણં મે પાતુ રાજર્ષિઃ ગણ્ડં મે જાનકીપતિઃ ।
કર્ણમૂલે ખરધ્વંસી ભાલં મે રઘુવલ્લભઃ ॥ ૧૩॥

જિહ્વાં મે વાક્પતિઃ પાતુ દન્તાવલ્યૌ રઘૂત્તમઃ ।
ઓષ્ઠૌ શ્રીરામચન્દ્રો મે મુખં પાતુ પરાત્પરઃ ॥ ૧૪॥

કણ્ઠં પાતુ જગદ્વન્દ્યઃ સ્કન્ધૌ મે રાવણાન્તકઃ ।
ધનુર્બાણધરઃ પાતુ ભુજૌ મે વાલિમર્દનઃ ॥ ૧૫॥

સર્વાણ્યઙ્ગુળિપર્વાણિ હસ્તૌ મે રાક્ષસાન્તકઃ ।
વક્ષો મે પાતુ કાકુત્સ્થઃ પાતુ મે હૃદયં હરિઃ ॥ ૧૬॥

સ્તનૌ સીતાપતિઃ પાતુ પાર્શ્વૌ મે જગદીશ્વરઃ ।
મધ્યં મે પાતુ લક્ષ્મીશો નાભિં મે રઘુનાયકઃ ॥ ૧૭॥

કૌસલ્યેયઃ કટિં પાતુ પૃષ્ઠં દુર્ગતિનાશનઃ ।
ગુહ્યં પાતુ હૃષીકેશઃ સક્થિની સત્યવિક્રમઃ ॥ ૧૮॥

ઊરૂ શાર્ઙ્ગધરઃ પાતુ જાનુની હનુમત્પ્રિયઃ ।
જઙ્ઘે પાતુ જગદ્વ્યાપી પાદૌ મે તાટકાન્તકઃ ॥ ૧૯॥

સર્વાઙ્ગં પાતુ મે વિષ્ણુઃ સર્વસન્ધીનનામયઃ ।
જ્ઞાનેન્દ્રિયાણિ પ્રાણાદીન્ પાતુ મે મધુસૂદનઃ ॥ ૨૦॥

પાતુ શ્રીરામભદ્રો મે શબ્દાદીન્ વિષયાનપિ ।
દ્વિપદાદીનિ ભૂતાનિ મત્સમ્બન્ધીનિ યાનિ ચ ॥ ૨૧॥

જામદગ્ન્યમહાદર્પદલનઃ પાતુ તાનિ મે ।
સૌમિત્રિપૂર્વજઃ પાતુ વાગાદીનીન્દ્રિયાણિ ચ ॥ ૨૨॥

રોમાઙ્કુરાણ્યશેષાણિ પાતુ સુગ્રીવરાજ્યદઃ ।
વાઙ્મનોબુદ્ધ્યહઙ્કારૈઃ જ્ઞાનાજ્ઞાનકૃતાનિ ચ ॥ ૨૩॥

જન્માન્તરકૃતાનીહ પાપાનિ વિવિધાનિ ચ ।
તાનિ સર્વાણિ દગ્ધ્વાઽઽશુ હરકોદણ્ડખણ્ડનઃ ॥ ૨૪॥

પાતુ માં સર્વતો રામઃ શાર્ઙ્ગબાણધરઃ સદા ।
ઇતિ શ્રીરામચન્દ્રસ્ય કવચં વજ્રસમ્મિતમ્ ॥ ૨૫॥

ગુહ્યાદ્ગુહ્યતમં દિવ્યં સુતીક્ષ્ણ મુનિસત્તમ ।
યઃ પઠેત્ શૃણુયાદ્વાપિ શ્રાવયેદ્વા સમાહિતઃ ॥ ૨૬॥

સ યાતિ પરમં સ્થાનં રામચન્દ્રપ્રસાદતઃ ।
મહાપાતકયુક્તો વા ગોઘ્નો વા ભ્રૂણહા તથા ॥ ૨૭॥

શ્રીરામચન્દ્રકવચપઠનાત્ સિદ્ધિમાપ્નુયાત્ । (શુદ્ધિમાપ્નુયાત્)
બ્રહ્મહત્યાદિભિઃ પાપૈર્મુચ્યતે નાત્ર સંશયઃ ॥ ૨૮॥

ઇતિ શ્રીશતકોટિરામચરિતાન્તર્ગતે શ્રીમદાનન્દરામાયણે
વાલ્મિકીયે મનોહરકાણ્ડે ત્રયોદશસર્ગાન્તર્ગતં શ્રીરામકવચં

સમ્પૂર્ણમ્ ॥

હનુમત્-લક્ષ્મણ-સીતા-રામ-ભરત-શત્રુઘ્ન
ષટ્ કવચાનિ પઠનીયમ્ ।
ષટ્ કવચાનિ પઠિતું અશક્તશ્ચેત્
હનુમત્-લક્ષ્મણ-સીતા-રામ –
અથવા હનુમત્-સીતા-રામ
અથવા હનુમત્-રામ / સીતા-રામ કવચાનિ ।
અથવા શ્રીરામકવચમેવ પઠનીયમ્ ॥

All the six kavachas
hanumat-lakShmaNa-sItA-rAma-bharata-shatrughna
from AnandarAmAyaNa should be recited together.
If one is unable to recite all the six,
then he/she can recite in the decreasing order
hanumat-lakShmaNa-sItA-rAma
hanumat-sItA-rAma
hanumat-rAma
sItA-rAma
If this is not possible, then one should at least
recite Shri Rama Kavacham.

Encoded by Antaratma antaratma at Safe-mail.net
Proofread by Antaratma, PSA Easwaran

*Shrirama Kavacham*
pdf was typeset on April 26, 2024

Please send corrections to *sanskrit@cheerful.com*